त्वव्यवस्थापनम्। इतरगुणत्वनिवारणेन ज्ञानादेरात्मधर्म्मत्वव्यवस्थापनम्। स्मरणोपयोगिप्रणिधानादिकारणानि। बुद्ध्यादेः आशुविनाशित्वव्यवस्थापनम्। रूपादेरिव यावद्द्रव्यभावित्वाभावेन ज्ञानादिविशेषगुणानां देहधर्म्मत्वनिरासेनात्मधर्म्मत्वसमर्थनम्। केशनखादिषु सुखाद्यनुपलब्धेः त्वक्पर्य्यन्तस्यैव देहस्य सुखाद्यवच्छेदकत्वसाधनम्। प्रतिदेहं मनसो नानात्वखण्डनम्। एकत्वेऽपि मनसः शीघ्रसञ्चारः। ज्ञानयौगपद्यस्य भ्रमत्वसमर्थनेन मनोऽणुत्वसाधनम्। देहस्य अदृष्टसापेक्षोत्पत्तिकत्वसाधनम्। अदृष्टसहकारेणैव मातापित्राहारस्य तदारम्भकत्वसमर्थनम्। अदृष्टाभावे नित्यात्मनः संयोगेऽपि न देहोत्पत्तिरिति निरूपणम्। आत्मनोविभुत्वे सर्वशरीरैः संयोगे सत्यपि तददृष्टजन्यदेह एव तस्य विशेषसंयोगः भोगसाधक इति नियमनम्। परमाणुगतादृष्टाङ्गीकर्त्तुरार्हतस्य मतनिराकरणम् अदृष्टस्य मनोगुणत्वस्यापि तन्मतसिद्धस्य निराकरणम्। ३अ० २आ० गतार्थाः। प्रवृत्तिसाधनरागद्वेषाभिनिवेशात्मकदोषत्रैविध्यकथनम्। तत्र मोहस्य सर्व्वानर्थमूलत्वेन पापीयस्त्वसमर्थनम्। आत्मनोनित्यत्व एव प्रेत्यभावसिद्धिः अनित्यत्वे न तत्सिद्धिस्तथा च एकजातीयशरीरेणाद्यःसम्बन्ध उत्पादः तत्र चरमसम्बन्धनाशोमरणं तयोरेकस्मिन् आत्मनि नित्ये एव सम्भवः शरीरादेर्नष्टत्वात् न तदाश्रयत्वमिति समर्थनम्, उत्पत्तिप्रकारनिरूपणम्। बीजानामुपमर्द्देनाङ्कुरोत्पत्तिदर्शनात् अभावादेव भावोत्पत्तिरिति अभावोपादनत्वमतनिराकरणम्। कर्म्मनिरपेक्षस्य ईश्वरस्यैव जगत्कारणत्वमतखण्डनेन कर्मसापेक्षस्य तस्य जगत्कारणत्वव्यवस्थापनम्। परमाण्वादिवदीश्वरस्य नोपादानत्वमिति व्यवस्थापनम्। भाष्ये तु गुणविशिष्टमात्मान्तरमीश्वर इतीश्वरलक्षणमुक्तम्। तदर्थश्च "गुणैर्नित्यज्ञानेच्छाप्रयत्नरूपविशेषगुणैः सामान्यगुणैश्च संयोगादिभिर्विशिष्टम् आत्मान्तरं जीवेभ्यो भिन्न आत्मा जगदाराध्यः सृष्ट्यादिकर्त्ता वेदद्वारा हिताहितोपदेशकोजगतः पितेति" इत्याद्युक्तः। कण्टकतैक्ष्ण्यवज्जगतामाकस्मिकत्वखण्डनम्। सर्वानित्यत्वखण्डनम्। सर्वनित्यत्वखण्डनम्। घटादीनां परमाणुपुञ्जात्मकतावादखण्डनेन एकावयविसाधनम् सर्वभूतानामभावरूपतानिराकरणम्। संख्यैकान्तवादनिराकरणम्। संख्यैकान्तवादाश्च भाष्ये बहवो दर्शिताः। "सर्वमेकं सदविशेषात्, सर्वं द्वेधा नित्यानित्यभेदात्, सर्वं त्रेधा ज्ञाता ज्ञेयं ज्ञानमिति, सर्वं चतुर्द्धा प्रमाता प्रमाणम् प्रमितिः प्रमेयमिति, एवमन्येऽपि"। तत्र यथा नित्यत्वानित्यत्वाभ्यां द्वैधं तथा सत्त्वेनैक्यम् घटः सन् पटः सन्नित्येकाकारसत्त्वप्रतीतेः। अन्ये तु एकमित्यद्वैतमाहुस्तथा च ब्रह्मैवैकं निर्विशेषं सत् सर्वमन्यन्मिथ्या। अन्येऽपीति रूपसंज्ञासंस्कारवेदनानुभवाः पञ्च स्कन्धाः षट्पदार्थी सप्तपदार्थीत्यादि मतभेदाः। तत्राद्वैतपक्षनिराकरणं यथा ब्रह्माद्वैतस्वीकारे तत्साधकप्रमाणस्यासिद्धिः प्रमाणसत्त्वे तु न सत्त्वैकत्वसिद्धिरित्थं दूषणेन सत्त्वैकत्ववादनिराकरणम्। यथा वृक्षमूलसेकात् तदीयावयवोपचयद्वारवशेन फलोत्पत्तिस्तथा यागादेर्नाशेऽपि तज्जन्यादृष्टरूपद्वारसत्त्वात् स्वर्गाद्युत्पत्तिरिति व्यवस्थापनम्। स्वर्गादेः स्वरूपेण फलत्वसाधनम्। फलस्य उत्पत्तेः प्रागसत्त्वेन शशशृङ्गादेरिव उत्पत्त्यसम्भवः सत्त्वे च उत्पत्त्ययोग्यतया कारणव्यापारानर्थक्यं सदसत्त्वाङ्गीकारे च विरोध इत्याशङ्क्य फलस्य उत्पत्तेः प्राक् असत्त्वव्यवस्थापनम् असत उत्पत्तौ इह तन्तुषु पटो भविष्यतीति प्रागभावज्ञानस्यैव प्रवर्त्तकतयाऽनियमवारणम्। कर्म्मकर्त्तृदेहादेर्नाशेऽपि अदृष्टस्यात्मन्येवोत्पत्तेः तेनैव चादृष्टेन जायमाने स्वर्गादिदेहे सुखभोगे सामानाधिकरण्यसम्भवेनादृष्टजन्यस्वर्गादिफलस्यात्मनिष्ठत्वव्यवस्थापनम्। सुखदुःखयोरेव मुख्यफलत्वं स्त्रीपुत्रादेस्तु तत्साधनत्वादौपचारिकफलत्वमिति नादृष्टसामानाधिकरण्यव्याघात इति समर्थनम्। देहसम्बन्धस्यैव विविधबाधनायोगहेतुत्वाद्दुःखरूपत्वकथनम् विविधदुःखयुक्ततया शरीरस्य दुःखत्वेन भावनाकथनम् दुःखमध्ये सुखस्याप्युत्पत्तेस्तत्प्रत्याख्यानानौचित्येऽपि तदुपार्ज्जनादौ दुःखबाहुल्यात् देहसंबद्धं सर्व्वं दुःखमित्येव भावनीयमिति निरूपणम्। प्रतिषिद्धभोजनमैथुनादौ प्रवृत्तिनिवारणार्थमपि दुःखस्य हेयत्वोक्तिः। आर्षदैवपैत्रर्णापाकरणानुबन्धेनापवर्गकालाभावमाशङ्क्य आयुषश्चतुर्थभागेऽपवर्गसाधनकालत्वसाधनम् तथा कामनाशून्यस्य विरक्तस्य ततोऽर्वागपि तत्सेवनव्यवस्थापनम्। तत्त्वज्ञानोत्पत्तौ प्रारब्धातिरिक्तकर्म्मजन्यादृष्टमात्रनाशेन न स्वर्गफलकादृष्टेन प्रतिबन्ध इति कथनम्। क्लेशानुबन्धकृतापवर्गाभावमाशङ्क्य सुषुप्तस्य सर्व्वक्लेशाभाववदपवर्ग इति सुषुप्तिदृष्टान्तेन हेत्वभावेनाऽपवर्गे दुःखाभावसाधनम्। रागशून्यस्यानुत्पत्तेः रागादीनां च मिथ्याज्ञाननिमित्तकत्वेन तत्त्वज्ञानेन च मिथ्याज्ञाननिवृत्तौ दुःखनिवृत्तिरिति